© vyoma-saṃskṛta-pāṭhaśālā – www.sanskritfromhome.in

# परमलघुमञ्जूषा – शक्तिप्रकरणम्

## अभ्यासप्रश्नाः - उत्तराणि

**सूक्तम् उत्तरं चिनुत (एकस्य प्रश्नस्य नैकानि उत्तराणि सम्भवेयुः)।**

१. स्फोटो नाम कः?

- ध्वनिः
- पदार्थः
- अर्थवाचकः शब्दः
- विस्फोटनम्

२. स्फोटः कतिविधः?

- षड्विधः
- एक एव
- अष्टविधः
- दशविधः

३. एतेषु कः मुख्यः?

- वाक्यस्फोटः
- पदस्फोटः
- अखण्डवाक्यस्फोटः
- अखण्डपदस्फोटः

४. वर्णस्फोटे वर्णशब्दस्य कः अर्थः?

- अक्षरम् (अकारादि)
- रागः (पीत-रक्तादि)
- प्रकृति-प्रत्ययाः
- अक्षरसमूहः

५. लोके अर्थबोधकत्वं कस्य?

- पदस्य
- वाक्यस्य
- वर्णस्य
- प्रकृतिप्रत्ययानाम्

६. शाब्दबोधे किं किम् अपेक्षितम्?

- वृत्तिग्रहः
- वृत्तिविषयकः उद्बुद्धसंस्कारः
- व्याकरणज्ञानम्
- पदस्य ज्ञानम्
- पदनिष्पत्तेः ज्ञानम्

७. कश्चित् बालकः 'गौः' इति शब्दम् उच्चारयति। अपरः बालकः एतं शब्दं शृणोति। तस्य शाब्दबोधे कस्य कस्य भानं भवति?

- गोत्वस्य
- आकाशस्य
- उच्चारकस्य बालकस्य
- गोव्यक्तेः
- प्राणित्वस्य
- शृण्वतः बालस्य

८. तार्किकमतानुगुणं शक्तिः

- ईश्वरेच्छारूपा
- सङ्केतः
- तादात्म्यम्
- पद-पदार्थयोः सम्बन्धः

९. वैयाकरणमतानुगुणं शक्तिः

- पद-पदार्थयोः सम्बन्धः
- इतरेतराध्यासः
- तादात्म्यम्
- वाच्य-वाचकभावः
- सामर्थ्यम्

१०. पद-पदार्थयोः मध्ये कीदृशः सम्बन्धः नास्ति?

- वाच्य-वाचकभावः
- तादात्म्यम्
- संयोगः
- शक्तिः

११. एतेषु किं युक्तम्?

- शक्तिः सम्बन्धः, शक्यं पदम्, शक्तः अर्थः
- शक्तिः अर्थः, शक्तः सम्बन्धः, शक्यं पदम्
- शक्तं पदम्, शक्यः अर्थः, शक्तिः सम्बन्धः
- शक्तिः पदम्, शक्यः अर्थः, शक्तः सम्बन्धः

१२. वैयाकरणसिद्धान्ते तादात्म्यसम्बन्धः कयोः

- बाह्यपदार्थस्य श्रुतस्य शब्दस्य च
- बौद्धपदार्थस्य श्रुतस्य शब्दस्य च
- बाह्यपदार्थस्य स्फोटस्य च
- बौद्धपदार्थस्य स्फोटस्य च

१३. तार्किकसिद्धान्ते अपभ्रंशैः शाब्दबोधः कथं भवति?

- शक्त्या
- साधुशब्दस्मरणद्वारा

- शक्तिभ्रमेण
- शाब्दबोधो न भवति

१४. वैयाकरणसिद्धान्ते अपभ्रंशैः शाब्दबोधः कथं भवति?

- शक्त्या
- साधुशब्दस्मरणद्वारा
- शक्तिभ्रमेण
- शाब्दबोधो न भवति

१५. पदानां साधुत्वं नाम किम्?

- उत्तमत्वम्
- व्याकरणान्वाख्येयत्वम्
- अर्थबोधकत्वम्
- पुण्यजनकतावच्छेदकत्वम्
- संन्यासित्वम्

१६. पङ्कजपदे कीदृशी शक्तिः?

- रूढिः
- योगः
- योगरूढिः
- यौगिकरूढिः

१७. एतेषु कः शब्दः यौगिकः न?

- श्रोता
- शङ्करः
- पिता
- कृतिः

१८. ‘मण्डपः’ इति पदं कीदृशम्

- रूढम्
- यौगिकम्
- योगरूढम्
- यौगिकरूढम्

१९. ‘भीमार्जुनौ’ इत्यत्र अर्जुनशब्दस्य शक्तिनियमने किं सहायकम्?

- संयोगः
- साहचर्यम्
- विरोधिता
- प्रकरणम्

२०. ‘मित्राय रवये नमः’ इत्यत्र मित्रशब्दस्य शक्तिनियमने किं सहायकम्?

- लिङ्गम्
- व्यक्तिः
- अन्यस्य शब्दस्य सन्निधिः
- साहचर्यम्

**एतानि पदानि विभजत। (रूढम्/यौगिकम्/योगरूढम्/यौगिकरूढम्)**

१. कुम्भकारः - **यौगिकम्**
२. नदी - **रूढम्**
३. गतवान् - **यौगिकम्**
४. माला - **रूढम्**
५. पार्थः - **योगरूढम्**
६. गौः - **रूढम्**
७. मनसिजः - **योगरूढम्**
८. महारजतम् - **यौगिकरूढम्**
९. राघवः - **यौगिकम्/योगरूढम्**
१०. रावणारिः - **योगरूढम्**

© vyoma-saṃskṛta-pāṭhaśālā – www.sanskritfromhome.in

**हरिशब्दस्य अस्मिन् वाक्ये कुत्र शक्तिः? तत्र नियामकं किम्?**

१. सशङ्खचक्रो हरिः। - विष्णुः, संयोगः
२. अवज्रो हरिरागतः। - इन्द्रः, विप्रयोगः
३. हरीश्वरः सुग्रीवः। - वानरः, शब्दस्यान्यस्य सन्निधिः
४. उत्कृष्टा हरयो वायुवेगेन धावन्ति। - अश्वः, सामर्थ्यम्
५. हरिहरौ नमस्कार्यौ। - विष्णुः, साहचर्यम्
६. स्वगुहायां हरिश्शेते। - सिंहः, देशः/अर्थः